प्रश्नोत्तरमाला।

३३२

श्रीलक्ष्मीधर - विद्यामन्दिर,
देवप्रयाग (गढ़वाल-हिमालय)
व्यवस्थापक- पं. चक्रधरजोशी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ॐश्री गणेशाय नमः श्रीहनुमते नमः
अपारसंसारसमुद्रमध्ये संमज्जतो
मे शरणं किमस्ति गुरो कृपालो कृ
पया वदेतद्विश्वेशपादांबुजदीर्घनौ
का १ बद्धो हि को यो विषयानुरागी
को वा विमुक्तो विषये विरक्तः को
वास्ति घोरो नरकः स्वदेहस्तृष्णा
क्षयः स्वर्गपदं किमस्ति २ संसारहृ
त्कः श्रुतिजात्मबोधः को मोक्षहेतुः
कथितः स एव द्वारं किमेकं नरक
स्य नारी का स्वर्गदा प्राणभृताम
हिंसा ३ शेते सुखं कस्तु समाधि
निष्ठो जागर्ति को वा सदसद्विवेकी।
के शत्रवः सन्ति निजेन्द्रियाणि का
न्येव मित्राणि जितानि ४ को वा दरि तानि
द्रो हि विशालतृष्णः श्रीमांस्तु को य
स्य समस्ततोषः जीवन्मृतः कस्तु
निरुद्यमो यः को वामृतः स्यात्सुख
दा निराशा ५ पाशो हि को यो ममता
भिधानः संमोहयत्येव सुरेव का स्त्री।
को वा महान्धो मदनातुरो यः मृत्यु
श्च को [illegible] स्वकीयम् [illegible] को वा

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

२. २ गुरुर्यो हि हितोपदेष्टा शिष्यस्तु
को गुरुभक्त एव को दीर्घरोगो
भव एव साधो किमौषधं तस्य वि
चार एव ७ किं भूषणाद्भूषणमा
मस्ति शीलं तीर्थं परं किं स्वमनो
विशुद्धम् किमत्र हेयं कनकं
च कांता श्राव्यं सदा किं गुरुवेद
त वाक्यम् ८ के हेतवो ब्रह्मगतेस्तु
सन्ति सत्संगतिर्दानविचारतो
षाः के सन्ति सन्तोऽखिलवीत
रागा अपास्तमोहाः शिवतत्वनि
ष्ठाः ९ को वा ज्वरः प्राणभृतां हि
चिंता मूर्खोऽस्ति को यस्तु विवेकहीनः।
कार्या प्रिया का शिवविष्णुभक्तिः
किं जीवनं दोषविवर्जितं यत् १०
विद्या हि का ब्रह्मगतिप्रदा या बोधो
ऽस्ति को यस्तु विमुक्तिहेतुः। को ला
भ आत्मावगमो हि यो वै जितं ज
गत्केन मनो हि येन ११ शूरान्म
को हाशूरतमोऽस्ति को वा मनोजबाणै
र्व्यथितो न यस्तु प्राज्ञोऽतिधीर
श्च समोऽस्ति को वा प्राप्तो न मोहं ल

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

लनाकटाक्षैः १२ विषाद्विषं किं
विषयाः समस्ता दुःखी सदा को वि
षयानुरागी धन्योस्ति को यस्तु
परोपकारी कः पूजनीयो ननु तत
त्वदर्शी १३ सर्वास्ववस्थास्वपि किं
न कार्यं किं वा विधेयं विदुषा प्रयत्ना
त् स्नेहश्च पापं पठनं च धर्मः संसा
रमूलं हि किमस्ति चिंता १४ विज्ञान्म
हाविज्ञतमोस्ति को वा नार्या पिशा
च्या न हि वंचितो यः का श्टंखला प्रा
णभृतां हि नारी दिव्यं व्रतं किं च निर
स्तदैन्यं १५ ज्ञातुं न शक्यं हि किम
स्ति सर्वैर्योषिन्मनो यच्चरितं तदीयम्
का दुस्त्यजा सर्वजनैर्दुराशा विद्यावि
हीनः पशुरस्ति को वा १६ वासो न सं
गः सह कैर्विधेयो मूर्खैश्च पापैश्च ख
लैश्च नीचैः मुमुक्षुणा किं त्वरितं वि
धेयं सत्संगतिर्निर्ममतेशभक्तिः १७
लघुत्वमूलं च किमर्थितैव गुरुत्व
बीजं यदयाचनं किं जातोस्ति यस्य कोः
पुनर्न जन्म को वा मृतो यस्य पुनर्न मृ
त्युः १८ मूकोस्ति को वा बधिरोस्ति को

CC-0. Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वायुर्ज्ञानं नलं समये समर्थः प
१९ थ्यं सुपथ्यं न च रोगनिवृत्तिः विश्वा
२ सपात्रं न किमस्ति नारी १९ तत्वे
किमेकं शिवमद्वितीयं किमुत्तमं
सच्चरितं यदस्ति किं कर्म कृत्वा
न च शोचनीयं कामारिकंसारिसम
र्चनाख्यम् २० शत्रोर्महाशत्रुत
मोस्ति को वा कामः सकोपानृतलो
भतृष्णाः न पूर्य्यते को विषयैः
स एव किं दुःखमूलं ममताभिधा
नं २१ किं मंडनं साक्षरता मुखस्य
सत्यं च किं भूतहितं तदेव त्यक्ता
सुखं किं स्त्रियमेव सम्यक् देयं परं किं
त्वभयं सदैव २२ कस्यास्ति नाशे म
नसो हि मोक्षः क्व सर्वथा नास्ति भयं
विमुक्तौ शल्यं परं किं निजमूर्खतैव ते
के के ह्युपास्या गुरवश्च वृद्धाः २३
उपस्थिते प्राणहरे कृतांते किमाशु कार्यं
सुधिया प्रयत्नात् वाक्कायचित्तैः सु
खदं यमघ्नं मुरारिपादांबुजमेव चिंत्य
म् २४ के दस्यवः संति कुवासनाख्याः
कः शोभते कः सदसि प्रविद्यः मातेव
CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri
काया सुखदा सुविद्या किमेधते दानव

शास्तुभिच्या २५ कुतो हि भीतिः सततं
विधेया लोकापवादाद्भवकाननाच्च।
कोवास्ति बंधुः पितरौ च कौ वा विपत्स
हायः परिपालको यो २६ बुध्वान
बोद्धुं परिशिष्यते किं शिवप्रशांतंस्व
स्वबोधरूपं। ज्ञाते न कस्मिन्विदितं ज ७
गत्स्यात्सर्वात्मके ब्रह्मणि पूर्णरू
पे २७ किं दुर्लभं सद्गुरुरस्ति लोके
सत्संगतिर्ब्रह्मविचारणा च। त्यागो
हि सर्वस्य शिवात्मबोधः किं दुर्जयं स
र्वजनैर्मनोजः २८ पशोः पशुः को
न करोति धर्मं प्राधीतशास्त्रोपि न
चात्मबोधः किं तद्विषं भाति सुधोप
मं स्त्री के शत्रवो मित्रवदात्मजाद्याः २९
विद्युच्चलं किं धनयौवनायुर्दानं प
रं किं च सुपात्रदत्तं कंठंगतैरसुभि
र्न कार्यं किं किं विधेयं मलिनं शिवा
र्चा ३० किं कर्म यत्प्रीतिकरं मुरारेः
क्वास्था न कार्या सततं भवाब्धौ अ
हर्निशं किं परिचिंतनीयं संसारमिथ्या
त्वशिवात्मतत्वम् ३१ कंठंगता वा
श्रवणंगता वा प्रश्नोत्तराख्यामती

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

१. रत्नमाला तनोतु मोदं विदुषां
२ स्तु रम्या रचेश गौरीश कथेव सद्यः
३२ इति श्रीब्रह्मोलरी संपूर्णा
कांता कांचन चक्रे याभ्रामितं भुव
७६४ / द.भी. / ११४ नत्रयं तास्तु ते भाविरक्तो योगाद्विती
यः परमेश्वरः

सं. १९५० देवप्रयाग

श्रीलक्ष्मीधर - विद्यामन्दिर.
देवप्रयाग (गढ़वाल-हिमालय)
व्यवस्थापक- पं. चक्रधर जोशी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri